# Devaih Kritam 08 Durga Stotram

# દેવૈઃ કૃતં ૮ દુર્ગાસ્તોત્રમ્ ૨૧

## Document Information

Text title : Devaih Kritam 08 Durga Stotram

File name : devaiHkRRitaM08durgAstotram21.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 180/3-22||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

# દેવૈઃ કૃતં ૮ દુર્ગાસ્તોત્રમ્ ૨૧

દેવાઃ કૈલાસમાસાદ્ય સુસ્થાને પ્રણિપદ્ય ચ ।
સસ્મરુશ્ચ પ્રણેમુશ્ચ તુષ્ટુવુશ્ચ તદા સતીમ્ ॥ ૩॥

દેવ્યુભે ઓમિતિ ત્વં વૈ ગાયત્રી પરમેશ્વરી ।
પૂજિતા બ્રહ્મમુનિભિરૂર્જિતા રાજભિર્નૃપૈઃ ॥ ૪॥

ત્વં ભૂરિતિવિડ્ભિઃ પૃથ્વી શૂદ્રૈઃ શિવેતિ પૂજિતા ।
ક્ષાન્તિર્મુનીનામક્ષોભ્યા દયા નિયમિનામપિ ॥ ૫॥

ત્વં મહોપાયસન્દોહા નીતિર્નયવિસર્પિણામ્ ।
પરિચિતિસ્ત્વમર્થાનાં ત્વમીહા પ્રાણિહૃચ્છ્રયા ॥ ૬॥

ત્વં મુક્તિઃ સર્વભૂતાનાં ત્વં મતિઃ સર્વદેહિનામ્ ।
ઈતિસ્ત્વં રક્તચિત્તાનાં પ્રીતિસ્ત્વં હૃદિ દેહિનામ્ ॥ ૭॥

ત્વં કીર્તિઃ સત્યભૂતાનાં ત્વં શાન્તિર્દુષ્ટકર્મણામ્ ।
ત્વં ભ્રાન્તિઃ સર્વભૂતાનાં ત્વં ગતિઃ ક્રતુયાજિનામ્ ॥ ૮॥

ત્વં સમુદ્રમહાવેલા ત્વં ચ લીલા વિલાસિનામ્ ।
સમ્ભૂતિસ્ત્વં પદાર્થાનાં સ્થિતિસ્ત્વં લોકપાલિનામ્ ॥ ૯॥

ત્વં કાલરાત્રિર્નિઃશેષભુવનાવલિવાસિની ।
પ્રિયકણ્ઠગ્રહાનન્દદાયિની ત્વં વિભાવરી ॥ ૧૦॥

રક્ષિકા ત્વમનાથાનાં દર્શનં દેહિ ચામ્બિકે ।
અનેકૈર્વિવિધૈર્લોકે રૂપૈર્દેવિ ત્વમર્ચિતા ॥ ૧૧॥

સદા શિવપ્રિયે દુર્ગે ત્વાં નમામો મહેશ્વરિ ।
શ્રીશક્તિં પાવનીં પુષ્ટિં મહદવ્યક્તરૂપિણીમ્ ॥ ૧૨॥

વયં નમામહે ભક્ત્યા શુદ્ધાં બ્રહ્મપરાયણામ્ ।
અન્તર્વિદ્યાસુવિદ્યાભ્યાં સુપ્રીતાં ત્વાં નમામહે ॥ ૧૩॥

ત્વં દીધિતિઃ સૂર્યગતા કૌમુદી ચન્દ્રસઙ્ગતા ।
આપ્યાયયસિ બ્રહ્માદિતૃણાન્તં ત્વાં નમામહે ॥ ૧૪॥

ગાયત્રી ત્વં વેદમાતા ત્વં સાવિત્રી સરસ્વતી ।
ત્વં વાર્તા સર્વજગતાં ત્વં ત્રયી ધર્મરૂપિણી ॥ ૧૫॥

ત્વં નિદ્રા સર્વભૂતેષુ ક્ષુધા તૃપ્તિસ્ત્વમેવ હ ।
ત્વં લક્ષ્મીઃ પુણ્યકર્તૃણામલક્ષ્મીઃ પાપિનાં તથા ॥ ૧૬॥

ત્વં શાન્તિઃ સર્વજગતાં ત્વં ધાત્રી પ્રાણપોષિણી ।
ગીતિસ્ત્વં સામવેદસ્ય ગ્રન્થિસ્ત્વં યજુષાં હુતિઃ ॥ ૧૭॥

ઋગ્વેદસ્ય તથા માત્રાઽથર્વણસ્ય પરા ગતિઃ ।
સમસ્તગીર્વાણશક્તિર્દુઃખનિસ્તારકારિણી ॥ ૧૮॥

શિવે રુદ્રાણિ સન્નિદ્રે ચણ્ડે કાત્યાયનિ સતિ ।
કૌશિકિ ચણ્ડિકે કાલિ નારાયણિ નમોઽસ્તુ તે ॥ ૧૯॥

તપઃપ્રિયે સદાદૃશ્યે પાર્વતિ તે નમોનમઃ ।
પ્રસન્ના ભવ દેવેશિ દર્શનં દેહિ સુવ્રતે ॥ ૨૦॥

મેનાયાં લભ પુત્રીત્વં મહાદેવિ નમોઽસ્તુ તે ।
ઇત્થં દેવૈઃ સ્તુતા દેવી દુર્ગા દુર્ગતિનાશિની ॥ ૨૧॥

આવિર્બભૂવ દેવાનાં પુરતો જગદમ્બિકા ।
બભૂવાઽઽનન્દસન્દોહઃ સર્વેષાં ત્રિદિવૌકસામ્ ॥ ૨૨॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૧૮૦-અધ્યાયાન્તર્ગતં
દેવૈઃ કૃતં દુર્ગાસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૧૮૦/૩-૨૨॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 180/3-22..

Proofread by PSA Easwaran

*Devaih Kritam 08 Durga Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*